ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ವಿಶ್ವವಿದ್ಯಾಲಯ, ಬೆಂಗಳೂರು – 560018

KARNATAKA SAMSKRIT UNIVERSITY, BANGALORE - 560018.

48/70

ಪರೀಕ್ಷಾ ಕೊಠಡಿಯಲ್ಲಿ ಅಭ್ಯರ್ಥಿಗಳು ಅನುಸರಿಸಬೇಕಾದ ಸೂಚನೆಗಳು

## INSTRUCTIONS TO CANDIDATES (at the Examination Hall)

1. ಪ್ರವೇಶ ಪತ್ರದ ಹಿಂಭಾಗದಲ್ಲಿ ಮುದ್ರಿಸಿರುವ ಸೂಚನೆಗಳನ್ನು ತಪ್ಪದೇ ಅನುಸರಿಸಬೇಕು.

   Please follow the instructions given in the Admission Ticket Carefully.

2. ಉತ್ತರಿಸುವ ಮುನ್ನ ಉತ್ತರಪತ್ರಿಕೆಯಲ್ಲಿ 20 ಪುಟಗಳು ಇದೆಯೇ ಎಂಬುದನ್ನು ಖಚಿತ ಪಡಿಸಿಕೊಳ್ಳಿ, ಸರಿಯಾಗಿ ಇಲ್ಲದಿದ್ದಲ್ಲಿ, ಕೊಠಡಿಯ ಮೇಲ್ವಿಚಾರಕರಿಂದ ಮತ್ತೊಂದು ಉತ್ತರಪತ್ರಿಕೆಯನ್ನು ಪಡೆಯಬೇಕು.

   Before answering the questions, ensure that the answer book contains 20 pages. In case it is defective, request the invigilator to issue a new answer book

3. ಅಭ್ಯರ್ಥಿಗಳು ಪರೀಕ್ಷೆಗೆ ಸಂಬಂಧಪಟ್ಟ ವಿಷಯಗಳಾದ ಡಿಗ್ರಿ, ವಿಷಯ, ಹೆಸರು, ನೋಂದಣಿ ಸಂಖ್ಯೆ, ಪರೀಕ್ಷಾ ದಿನಾಂಕ, ಉತ್ತರಪತ್ರಿಕೆಯ 2ನೆಯ ಪುಟದಲ್ಲಿರುವ ಭಾಗ–I ಹಾಗೂ ಭಾಗ–III ರಲ್ಲಿ ಬರೆಯಬೇಕು ಮತ್ತು 1ನೇ ಪುಟದಲ್ಲಿನ ಕೆಳಭಾಗದಲ್ಲಿಯೂ ಸಹ ಬರೆಯಬೇಕು.

   Candidates are instructed to write information such as Degree Exam, Subject, Candidate name, Registration No., Exam date, in Part-I and Part-III of page 2 and also **in the Bottom Portion of Page-1.**

4. ನಕ್ಷೆ ಅಥವಾ ಗ್ರಾಫ್ ಹಾಳೆಗಳನ್ನು ಉಪಯೋಗಿಸಿದಲ್ಲಿ ಅವುಗಳ ಮೇಲೆ ರಿಜಿಸ್ಟರ್ ನಂಬರ್ ಹಾಗೂ ಸ್ಟುಡೆಂಟ್ ಐ.ಡಿ. ಬರೆಯಬೇಕು.

   Write the Register No./Student ID on map / graph sheet, if used.

5. ಉತ್ತರಪತ್ರಿಕೆಯ ಕ್ರಮ ಸಂಖ್ಯೆಯನ್ನು ಕೊಠಡಿಯ ಮೇಲ್ವಿಚಾರಕರ ದಿನಚರಿಯಲ್ಲಿ ಬರೆದು ಪೂರ್ಣ ಸಹಿ ಮಾಡಬೇಕು.

   Candidates shall write the serial number of the Answer books and affix their signature, in token of their receiving the answer book in the invigilator's Dairy.

6. ಉತ್ತರಗಳನ್ನು ನೀಲಿ ಅಥವಾ ಕಪ್ಪುಶಾಹಿಯ ಪೆನ್ನನ್ನು ಮಾತ್ರ ಉಪಯೋಗಿಸಿ ಬರೆಯಬೇಕು.

   Answers must be written in black or blue ink.

7. ಉತ್ತರ ಪತ್ರಿಕೆಯಲ್ಲಿ ಖಾಲಿ ಉಳಿಯುವ ಎಳೆಯಬೇಕು.

   Score off all the blank pages left in th examination.

QP : 507(NV)
PKT: 1001 SLR: 7

8. ಪರೀಕ್ಷಾ ಅವಧಿ ಮುಗಿಯುವ ಮುನ್ನ ಪರೀಕ್ಷಾ ಕೇಂದ್ರದಿಂದ ಹೊರಗೆ ಹೋದಲ್ಲಿ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಕೊಠಡಿಯ ಮೇಲ್ವಿಚಾರಕರಿಗೆ ಕೊಡಬೇಕು.

   Candidate is required to handover the question paper to the room invigilator in case he / she leaves the examination hall before the closing of examination.

9. ಉತ್ತರಗಳನ್ನು ಬರೆದು ಮುಗಿಸಿದ ಕೂಡಲೇ (ಪರೀಕ್ಷಾ ಅವಧಿ ಕೊನೆಗೆ) ಕೊಠಡಿಯ ಮೇಲ್ವಿಚಾರಕರು ಬಂದು ತೆಗೆದುಕೊಳ್ಳುವವರೆಗೂ ಅದೇ ಸ್ಥಳದಲ್ಲಿ ಕುಳಿತಿರಬೇಕು.

   When candidates complete writing their answers they shall continue to sit in their place till the invigilator collects the answer book.

10. ಉತ್ತರ ಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲೂ ಸಹ ಸಂಕೇತ, ಗುರುತುಗಳನ್ನು ಉದಾಹರಣೆಗೆ ಶ್ರೀ ಎಂದಾಗಲಿ, ಓಂ ಎಂದಾಗಲಿ, ನಮಃಶಿವಾಯ, ಚುಕ್ಕೆಗಳು ಇತ್ಯಾದಿಗಳನ್ನು ಬರೆಯಬಾರದು.

    Code marks revealing identity such as "Om", "Shri, "Namah Shivaya" etc., should not be written any where in the answer books.

11. ಮೊಬೈಲ್ ಫೋನ್‌ಗಳನ್ನು ಹಾಗೂ ಇತರೆ ಎಲೆಕ್ಟ್ರಾನಿಕ್ಸ್ ಉಪಕರಣಗಳನ್ನು ಪರೀಕ್ಷಾ ಕೊಠಡಿಯೊಳಗೆ ತರಬಾರದು.

    Do not bring Mobile Phones and other electronic equipments inside the Examination Hall.

12. ಅಧಿಕ ಉತ್ತರ ಪತ್ರಿಕೆಗಳನ್ನು ಒದಗಿಸಲಾಗುವುದಿಲ್ಲ. ಈ ಪತ್ರಿಕೆಯಲ್ಲಿಯೇ ಎಲ್ಲಾ ಉತ್ತರಗಳನ್ನು ಬರೆಯಬೇಕು.

    **No additional sheets would be provided. All the answers has to be done in this booklet itself.**

---

Sample

**Part - I**

1. **Degree/Diploma** M.A.
2. **Exam (Year/Semester)** First Year
3. **Subject/Paper & Section** Alankara - Paper 1
4. **Registration No.** F 2 0 1 4 1 3 6 8 9 0
5. **Exam Date** 28 03 22

QP : 507(NV)
PKT: 1001 SLR: 7

---

**To be filled by Candidate**

**Registration No.** P 1 4 U C 2 1 A 0 0 5 4

**Answer Booklet Number**

11867

1

1) पञ्च हेत्वाभासाः - ~~हेत्व~~ हेतोः आभासः हेत्वाभासः।

असिद्धिः ~~असिद्धिः~~, सत्प्रतिपक्षम्, ~~विरुद्धः~~ विरोधः च

2) ~~निश्च~~ निश्चयसाध्यवान् सपक्षः। महानसे धूमः, वह्निः च व्याप्तौ भवतः। अत्र महानसः सपक्षः।

3) द्विविधा व्याप्तिः ⇒ 1) सम~~व्याप्ति~~व्याप्तिः - हेतुसाध्ययोः समरूपेण समव्याप्तिः।

2) विषमव्याप्तिः - यत्र यत्र अग्निः तत्र तत्र न धूमः। उद्गाः अयोगोले वह्निः

5) बाधः सद्धेतुसाधने (सद्-हेतुः-साधने) प्रतिबन्धकः।

4) ~~पृथिवीतरे~~ नवद्रव्याणि सन्ति। पृथिवी-अप्-तेजः-वायुः-आकाशः-~~[illegible]~~ कालः-दिग्-आत्म-मनांसि इति। सप्तपदार्थाः सन्ति। ~~सामान्य विशेष~~-द्रव्य-गुण-कर्म-समान्य-~~विशे~~समवाय-अभावाः सप्तपदार्थाः।

6) उपमानं प्रमाणेषु अन्तर्भवति। उपमान-प्रमाणेन जन्यं ज्ञान (प्रमा) उपमितिः

7) न्यायमते शक्तिः ⇒ ~~[illegible]~~ ईश्वरेच्छा (लाघवात्)।

उद्गाः- अस्मात् शब्दात् अयमर्थो बोद्धव्यः इत्याकारा वा इदं पदं इममर्थं बोधयतु इत्याकारा वा ईश्वरेच्छा शक्तिः लाघवत्। सैव सङ्केतः सम्बन्धः।

ಪ್ರತಿ ಪುಟದ ಒಟ್ಟು ಅಂಕಗಳು

14

8) पदपदार्थयोः सम्बन्धः शक्तिः । सैव सङ्केतः सम्बन्धः इति तर्के ।
सा च शक्तिस्त्रिधा । योगः , रूढिः , योगरूढिः च इति । यौगिकरूढम्
इत्यपि तर्के अस्ति ।

9) योग्यता नाम परस्परअन्वये शक्तिः ।
उदाः पयसा (जलेन) सिञ्चति । जले सेचन योग्यता जलस्य द्रवत्वलक्षणा
विद्यते । अग्निना सिञ्चति इति न साध्यम् - अत्र अयोग्यं वाक्यम् ।

6

10) वाक्यं अष्टविधम् । आख्यातशब्दो सङ्घातः जातिः सङ्घातवर्तिनी ।

एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥
पदमाद्यं पृथक्सर्वं पदं साकाङ्क्षम् ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् ॥

KARNATAKA SAMSKRIT UNIVERSITY

III

1. तर्कसोपानम् इति ग्रन्थः सार्थकनामधेयः । तर्कज्ञानप्राप्त्यर्थं अयं
ग्रन्थः सोपानमिव व्यवहरति । आचार्यअन्नंभट्टेन विरचितः तर्कसङ्ग्रहः नाम
ग्रन्थः अस्य ग्रन्थस्य मातृका ।

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥

इति अत्र मङ्गलश्लोकः ।
प्रत्यक्ष अनुमानोपमानशब्दाः इति चतुर्विधानि प्रमाणानि सन्ति ।
प्रमाकरणं प्रमाणम् । यथार्थज्ञानं प्रमा । प्रमाणं प्रमां जनयति ।

| | | | | |
|---|---|---|---|---|
| प्रमाणम् :- | प्रत्यक्षम् | अनुमानम् | उपमानम् | शब्दः |
| | ↓ | ↓ | ↓ | ↓ |
| प्रमा :- | प्रत्यक्षम् | अनुमितिः | उपमितिः | शाब्दः |

अनुमानप्रमाणस्य आवश्यकता लोके सर्वत्र दृश्यते ।

ಪ್ರತಿ ಪುಟದ ಒಟ್ಟು ಅಂಕಗಳು

अनुमानलक्षणम्

मूलम्:- अनुमितिकरणमनुमानम् । परामर्शजन्यं ज्ञानमनुमितिः ।

अनुसृत्यमानम् = अनुमानम् । अनुमीयते अनेन इत्यनुमानम् ।

अनुमिति - करणम् → अनुमानम् । व्यापारवत् असाधारणकारणं करणम् ।

प्रत्यक्षं वा शाब्दं वा अनुसृत्य अनुमानं वर्तते ।

उदा:- "पर्वतो वह्निमान्" इति अनुमितिः ।

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । "वह्निव्याप्यधूमवानयं पर्वतः" इति परामर्शः । तज्ज्ञान तज्जन्यं ज्ञानं "पर्वतो वह्निमान्" इति अनुमितिः ।

अत्र पर्वतः पक्षः (धर्मी) । साध्यः वह्निः । हेतुः धूमम् इति ।

प्रथमं पर्वते धूमदर्शनम् । तत्पश्चात् व्याप्तिस्मरणम् । यत्र यत्र धूमः तत्र तत्र अग्निः इति ।

चक्षुणा व्यक्तिः गजं पश्यति । अयं गजः इति जानाति । तज्ज्ञानं प्रत्यक्षम् । महानसे धूमम् , अग्निं च बहुवारं पश्यति । भूयोदर्शनेन यत्र यत्र धूमः तत्र तत्र अग्निः इति ज्ञानं प्राप्यते । पर्वते धूमं पश्यति । यत्र यत्र धूमः तत्र तत्र अग्निः इति स्मरति । ततः वह्निव्याप्य धूमवान् अयं पर्वतः इति परामर्शः उत्पद्यते । तेन "पर्वतो वह्निमान् इति अनुमितिः जायते ।

छात्राः शालायां पञ्चवादने घण्टानादं शृण्वन्ति । पूर्वं बहुवारं ज्ञातवन्तः - पञ्चवादने घण्टानादेन पाठशाला समाप्यते इति ।

अत्र शाला पक्षः । घण्टानादश्रवणं हेतुः । 'घण्टानादेन पाठशाला समाप्तिमेति' इति अनुमितिः ।

हेतौ व्याप्तिः पक्षधर्मता च साधनाङ्गे । "पर्वतो वह्निमान्' इत्यनुमितौ पक्षः पर्वतः । धूमव्याप्तिः पक्षे (पर्वते) दृष्टम् । पर्वते एव साध्यः (वह्निः),

ಪ್ರತಿ ಪುಟದ ಒಟ್ಟು ಅಂಕಗಳು

12

हेतुः धूमं च स्तः। पक्षे हेतोः व्याप्तिः पक्षधर्मता।
हेतौ व्याप्तिः पक्षधर्मता च साधनाङ्गे। उभयसत्त्वे एव हेतुः सद्धेतुः भवति। यत्र धूमः तत्र अग्निः इति साहचर्यनियमो व्याप्तिः। व्याप्तेः वृत्तित्वं पर्वतादिषु दृश्यते। सा एव पक्षधर्मता। मैसूरु नगरे भूमौ आर्द्रतां दृष्ट्वा बेङ्गलूरु नगरे वृष्टिः इति न साध्यते। अतः हेतौ पक्षधर्मता आवश्यकी। पर्वते वृक्षाः सन्ति। अत्र वह्निः व्याप्तः नास्ति। एवञ्च हेतौ व्याप्तिः पक्षधर्मता च साधनाङ्गे।

## अनुमानप्रभेदाः

अनुमानप्रभेदाः द्विविधः - स्वार्थः परार्थः च इति।
स्वार्थानुमानं स्वीयानुमितिं जनयति। यत्र यत्र धूमः तत्र तत्र वह्निः इति महानसे बहुवारं पश्यति। महानसे धूम-वह्न्योः भूयोदर्शनेन धूम-वह्न्योः साहचर्यं स्मरणे भवति। अत्र पर्वते धूमं (दृष्ट्वा) पश्यन् "वह्निव्याप्यधूमवानयं पर्वतः" इति परामर्शः जायते। तेन "पर्वतो वह्निमान् इत्यनुमितिः" उत्पद्यते। अत्र स्वार्थानुमानेन अनुमितिः उत्पद्यते।

यदा सः अन्यं प्रति वदति तदा परस्य अपि अनुमितिः जायते। अत्र पञ्चावयववाक्यानि परे अनुमितिं जनयन्ति।

## पञ्चावयववाक्यानि

प्रत्यक्षहेतूदाहरणोपनयनिगमनानि पञ्चावयवानि।
यत्र धूमः तत्र वह्निः - इति प्रत्यक्षम्।
महानसे धूम-वह्न्योः नियतसाहचर्यम् उदाहरणम्।
'वह्निव्याप्यधूमवान् अयं पर्वतः' इति लिङ्गपरामर्शः।
इति उपनयः।

ಪ್ರತಿ ಪುಟದ ಒಟ್ಟು ಅಂಕಗಳು

तस्माद्वत् तथा - इति निगमनम्

यदा यः इतरव्यक्तिं प्रति पञ्चावयववाक्यानि वदति सः अपि अनुमितिं जानाति।

स्वार्थानुमितौ स्वार्थानुमानं भवति।

परार्थानुमानेन परस्य अनुमितिः

II "पर्वतो वह्निमान्" इत्यनुमितौ

1) पक्षः :- सन्दिग्ध साध्यवान् पक्षः । पक्षः पर्वतः, हेतुः, धूमः, साध्यः वह्निः

सपक्षः :- निश्चयसाध्यवान् सपक्षः । महानसः सपक्षः, हेतु - धूमः, साध्यः - वह्नि

विपक्षः :- निश्चय - साध्याभाववान् विपक्षः । महाह्रदे धूमः, वह्निः च न व्याप्त।

महाह्रदः विपक्षस्य उदाहरणम् ।

व्याप्तिः पक्षधर्मता च हेतौ साधनाङ्ग।

प्रति पुटद ಒಟ್ಟು ಅಂಕಗಳು

II

2) "स्वार्थानुमानम्" इति अनुमान प्रभेदः।

अनुमानप्रभेदः द्विविधः - स्वार्थः, परार्थः च।

स्वार्थानुमाने स्वीयानुमितिं जनयति।

उदा:- पर्वतो वह्निमान् इति अनुमितिः।

वह्निव्याप्य-धूमवान्-अयं-पर्वतः इति लिङ्गपरामर्शः।

वह्निः - साध्यः, धूमः - हेतुः, पक्षः - पर्वतः

एकः व्यक्तिः महानसे भूयो धूम-वह्न्योः साहचर्यं महानसे पश्यति। तेन यत्र यत्र धूमः तत्र तत्र अग्निः (वह्निः) इति ज्ञानं प्राप्यते। यदा सः पर्वते धूमं पश्यति तदा व्याप्तिस्मरणं भवति। वह्निव्याप्यधूमवान् अयं पर्वतः इति परामर्शः उत्पद्यते। तेन "पर्वतो वह्निमान" इति ज्ञानम् अनुमितिः। स्वार्थानुमानेन स्वार्थपरामर्शः - लिङ्गपरामर्शः। तेन स्वीयानुमति।

सः पञ्चावयवावयवानि यदा अन्यव्यक्तिं कथयति तदा परस्य अनुमितिः अपि भवति।

ಪ್ರತಿ ಪುಟದ ಒಟ್ಟು ಅಂಕಗಳು

3

II

4) शाब्दबोधे सहकारिणः :- सहकारिणः शाब्दबोधे मुख्यकारणानि सहकारं कुर्वन्ति।

१) आकाङ्क्षा २) योग्यता ३) सन्निधिः ४) तात्पर्यं च

इति वैयाकरणमतम्।

न्यायमते शब्दः कार्यः। शब्दः अनित्यः। उच्चरित प्रध्वंसाः वर्णाः)

१) आकाङ्क्षा - वाक्यसमयग्राहिका आकाङ्क्षा।

यदा रामः इति उक्त्वा एकघण्टानन्तरं शूरः इति वदामः चेत् वाक्यं किमिति न ज्ञातुं शक्नुमः।

२) योग्यता - परस्परान्वयधर्मः योग्यता।

पयसा सिञ्चति इति योग्यं वाक्यम्।

वह्निना सिञ्चति इति अयोग्यं वाक्यम्।

वह्नौ सेचन योग्यता नास्ति।

३) सन्निधिः :- ~~देवदत्तः~~ गिरिः भुक्तम् अग्निमान् देवदत्तेन इति वाक्ये भुक्तम् इति पदस्य सन्निधिः मन्दबुद्धौ शाब्दबोधे आलस्यं जनयति।

४) तात्पर्यम् :- सति ~~...~~ तात्पर्ये सर्वे ~~...~~ सर्वार्थ वाचकाः इति भाष्यम्। घटं दृष्ट्वा घटः इति ज्ञानम्, पटं दृष्ट्वा पटः इति बोधः एव भवति। घटं दृष्ट्वा पटः इति बोधः न भवति।

अत्र तात्पर्यम् एव कारणम्।

सैन्धवमानय इति भोजनसमये उक्तं चेत् लवणं बोधयति।

सैन्धवमानय इति युद्धसमये उक्तं चेत् अश्वमानयः इति बोधयति। ~~...~~ "प्रकरणम्" इति शक्तिनियामक विषये अपि अस्य प्रसक्तिः विद्यते।

ಪ್ರತಿ ಪುಟದ ಒಟ್ಟು ಅಂಕಗಳು

5

II

5) वाक्यं अष्टविधम् :-

आख्यातशब्दो सङ्घातः जातिः सङ्घातवर्तिनी ।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥
पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षम् ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् ॥

वाक्यमिति सखण्डम् इति तार्किकाः वदन्ति ।

अखण्डवाक्यस्फोटः इति वैयाकरणाः ।

आख्यातशब्दः एव वाक्यम् :- उदा:- पिधेहि

सङ्घातः :- पदसमूहः वाक्यम् - द्वारम् इति अध्याहृत्य द्वारं पिधेहि इति ।

सङ्घातवर्तिनी जातिः वाक्यम् इति ।

एकोऽनवयवः शब्दः इति वैयाकरणमतम् । अखण्डवाक्यपक्षे वर्तते ।

क्रमः :- पूर्वापरीभूत शब्दानां क्रमः वाक्यम् । रामः एव अत्र दुग्धं पिबति ।
रामः अत्र एव दुग्धं पिबति ।

बुद्ध्यनुसंहृतिः : शशशृङ्गः, कूर्मक्षीरः इत्यादि पदेषु नैयायिकमते भ्रमात् शाब्दबोधः ।

पदमाद्यम्: आद्यं पदम् वाक्यम् इति लाघवम् । साक्षात् इति पदमेव साक्षात्क्रियते इत्यत्र वाक्यं बोधयति। एतत् तार्किकाः वदन्ति।

पृथक् सर्वं पदं साकाङ्क्षम् इति अपि तार्किकाः अङ्गीकुर्वन्ति ।

शब्दः (वाक्यम्) अनित्यम् ,कार्यम् इति तार्किकाः । ते शब्दब्रह्मणः विषये न अङ्गीकारं प्रदर्शयन्ति ।

"पदसमूहो वाक्यम्" अर्थ परिसमाप्तौ इति न्यायभाष्यकारः । अस्य समर्थमिति शेषः ।

ಪ್ರತಿ ಪುಟದ ಒಟ್ಟು ಅಂಕಗಳು

5

III

3) शब्दप्रमाणम् :-

प्रत्यक्ष-अनुमान - उपमान - शब्दाः प्रमाणानि ।

शब्दः प्रमाणम् । शब्देन जायमानः बोधः शाब्दबोधः ।

प्रमाणम् - प्रमा

शब्दः → शाब्दः

नैयायिकमते शब्दः अनित्यः, कार्यरूपः च ।

पदस्य, वा वाक्यस्य वा ज्ञानं कथम् ?

उच्चार्यमाणे पदे वाक्ये वा पूर्वपूर्ववर्णाः प्रतिबिम्बाः इव भवन्ति । नो चेत् तेषां तात्पर्यम् अग्रिम-पदेषु अनुवर्तते ।

"पदसमूहो वाक्यमर्थसमाप्तौ" इति न्यायभाष्यकारः अस्य समर्थमिति शेषः ।

शशशृङ्गः, खपुष्पम् इत्यादि बौद्धिकपदार्थानां विषये भ्रमात् एव शाब्दबोधः इति तार्किकाः ।

ಪ್ರತಿ ಪುಟದ ಒಟ್ಟು ಅಂಕಗಳು

3

QP Code: 302

# कर्नाटकसंस्कृतविश्वविद्यालयः

## स्नातकपरीक्षाः - 2022

### बि.ए. संस्कृत - तृतीयवर्षम् (BA SAMSKRITA III Year)

### पत्रिका - 02; विषयः - षड्दर्शनसमुच्चयः

**Total No. Of Questions: 3** | **Total No. Of Printed Pages: 1**

**Date: 20.09.2022** | **Time: 10.30AM to 1.30PM** | **Max Marks: 100**

**I. एकेन वाक्येन समाधानं लिखत।** 10x2=20

1. न्यायदर्शनस्य प्रवर्तकः कः?
2. बौद्धमते कति प्रमाणानि अङ्गीकृतानि?
3. का नाम प्रकृतिः?
4. समवायो नाम कः?
5. गुणत्रयम् नाम किम्?
6. जैमिनिः कस्य दर्शनस्य प्रवर्तकः?
7. हरिभद्रसूरिणा विरचितः एकः ग्रन्थः कः?
8. पञ्चावयवाः के?
9. शब्दो नाम कः?
10. जैनमतस्य देवता काः?

**II. लघुटिप्पणीमारचयत।** 4x10=40

1. बौद्धमतानुसारेण प्रत्यक्षस्वरूपं लिखत।
2. त्रिविधमनुमानं उपपादयत।
3. सांख्यमतानुसारेण पञ्चमहाभूतोत्पत्तिं उपवर्णयत।
4. चार्वाकमतं संग्रहेण लिखत।
5. अर्थापत्तिप्रमाणं निरूपयत।
6. वादविषये निरूपणं कुरुत।
7. उपमानप्रमाणम्।

**III. निबन्धात्मकमुत्तरं लिखत ।** 20x2=40

1. पञ्चविंशतितत्त्वानि अधिकृत्य निबन्धमेकमारचयत।
2. वैशेषिकमतोक्तप्रमाणानां निरूपणं यथाग्रन्थं विवृणुत।
3. जैनमतस्य विवरणं विस्तरेण कुरुत।

*****

QP Code: 703 (VD)

# कर्नाटकसंस्कृतविश्वविद्यालयः - परिसरः

## स्नातकोत्तरपरीक्षाः - २०२२

## एम्.ए. - संस्कृत - चतुर्थषाण्मासिकी परीक्षा

## शास्त्रम् – वेदान्तशास्त्रम्, पत्रिका – ०३

## विषयः – न्यायसुधा

**Total No. Of Questions: 3** **Total No. Of Printed Pages: 1**

**Date: 19.10.2022** **Time: 02.00PM to 05.00PM** **Max Marks: 70**

I. द्वित्रैः वाक्यैः उत्तरं लिखत । (सर्वे प्रश्नाः समाधेयाः) 10x2=20

1. न्यायसुधायाः प्रथमं मङ्गलपद्यं लिखत ।
2. अपौरुषेयत्वं नाम किम् ?
3. अनुव्याख्यानस्य द्वितीयं मङ्गलपद्यम् अनुवदत ।
4. धर्मादीनां विषये प्रमाणं पौरुषेयं वाक्यं भवितुमर्हति वा ?
5. धर्माधर्मादीनां अनङ्गीकरे का अनुपपत्तिः ?
6. वेदव्यासः कथं दिवाकर इव वर्तते ?
7. समस्तवेदस्य अप्रामाण्यकथने का अनुपपत्तिः ?
8. वेदे अनृतत्वदोषः कुतः नास्ति ?
9. धर्मादीनां विषये प्रमाणं किम् ?
10. नारायणः कीदृशः इति श्रीमध्वाचार्यः वर्णयति ?

II. लघुनिबन्धरूपेण उत्तरं लिखत । [चतुर्णां एव] 4x5=20

1. न्यायसुधारीत्या वेदस्य पुनरुक्तिदोषं परिहरत ।
2. अनुमानेन बुद्दादीनां धर्मद्रष्टृत्वं कथं बौद्धेन साधितम् ?
3. नैय्यायिकरीत्या वेदस्य पौरुषेयत्वं कथम् ?
4. धर्माभावं वदता अपि कुतः अपौरुषेयं वाक्यम् अङ्गीकर्तव्यम् ?
5. धर्मस्य विषये प्रत्यक्षं कुतः प्रमाणं न ?
6. "व्याप्तिर्यस्य निधे..." इति पद्यस्य विवरणं लिखत ।

III. प्रबन्धरुपेण उत्तरं लिखत । [द्वयोः एव] 2x15=30

1. अपौरुषेयत्ववादं विस्तरेण निरूपयत ।
2. प्रामाण्यस्य स्वतस्त्वं कुतः अङ्गीकर्तव्यम् ?
3. चार्वाकमतस्य निरूपणं कृत्वा ग्रन्थोक्तदिशा निराकुरुत ।

* * * * *

## QP Code No.: MAVY2-III-02

Total No. of Questions: 3 | Total No. of Printed Pages: 2

# स्नातकोत्तरपरीक्षाः-२०२२

## कक्षा - एम्.ए. संस्कृतम् – तृतीयषाण्मासिकी परीक्षा

## शास्त्रम् : – व्याकरणम् - पत्रिका-२

## विषयः – महाभाष्यम् (समासः)

दिनाङ्कः–**27/04/2022** गरिष्ठाङ्काः– ७०

समयः 02.00 PM –5.00 PM Max. Marks - 70

---

**I एते प्रश्नाः समाधेयाः ।** 10 X 2 = 20

१) बहुलशब्दस्यार्थः कः?

२) अपपरिबहिरञ्चवः कया समस्यन्ते?

३) आयतीगवम् इत्यत्र कानि कार्याणि निपात्यन्ते?

४) 'अपदिशम्' इत्यत्र दिशा शब्दस्य ह्रस्वः केन सूत्रेण?

५) पदविधिशब्देन प्रमुखतः कानि कार्याणि गृह्यन्ते?

६) "इसुसोः सामर्थ्ये" इति शास्त्रेण किं विधीयते? तत्र च कीदृशं सामर्थ्यं स्वीक्रियते?

७) "पृथगर्थानामेकार्थीभावः समर्थवचनम्" इति वार्त्तिकस्य अर्थः कः?

८) भाष्यकारैः सिद्धान्तिताः त्रयः एकार्थीभावकृतविशेषाः के?

९) पुंवद्भावविधायकं सूत्रद्वयं लिखत ।

१०) बहुव्रीहिसमासे कः स्वरः? केन सूत्रेण? तत्पुरुषसमासे कः स्वरः? केन च सूत्रेण?

## II एतेषां प्रश्नानां लघुनिबन्धात्मकमुत्तरं लिखत (चतुर्णामेव) – 4 x 5 = 20

१) एतेषां प्रक्रियां लिखत –

अधिगोपम्, द्विमुनि, उपपौर्णमासम् – उपपौर्णमासि, अनुव्यचलत्

२) "सापेक्षमसमर्थवद्भवति" इति न्यायस्य अर्थः कः? कथं तेन न्यायेन महत् कष्टं श्रितः इत्यत्र तत्पुरुषसमासः वार्यते?

३) पञ्चवृत्तीनां पदविधित्वं साधयत ।

४) चतुर्विधानि वाक्यलक्षणानि कानीति उदाहरणपूर्वकं निरूपयत ।

५) किम् शब्दैरर्थाभिधानं स्वाभाविकम्, आहोस्वित् वाचनिकम्?

६) संख्याविशेषः, व्यक्ताभिधानम्, उपसर्जनविशेषणम्, चयोगः एकार्थीभावकृतविशेषाः इति उपपादयत ।

## III सविस्तरं एतेषां प्रश्नानामुत्तरं लिखत (द्वयोरेव) - 2 x 15 = 30

१) समासप्रकरणमादृत्य एकाम् सुदीर्घां टिप्पणीम् लिखत ।

२) समर्थः पदविधिः इति सूत्रे भाष्योक्ताः षड्पक्षाः के इति निरूप्य तेषु सिद्धान्तभूतः पक्षः कः इति विवृणुत ।

३) बहूनां समासप्रसङ्गे द्वयोः द्वयोः समास इति पक्षे दोषाः के इति विवेचनं कृत्वा, अविशेषेण समासः इति पक्षे दोषान् उपस्थाप्य तेषां परिहारोपायान् निर्दिशत ।

***

**QP Code No.: MAVY-02-III-04**

Total No. of Questions: 3 | Total No. of Printed Pages: 3

# स्नातकोत्तरपरीक्षाः-२०२२

## कक्षा - एम्.ए. संस्कृतम् – तृतीयषाण्मासिकी परीक्षा

## शास्त्रम् : – व्याकरणम् - पत्रिका-४

## विषयः – नव्यन्यायपरिभाषया

दिनाङ्कः–**29/04/2022** | गरिष्ठाङ्काः– ७०

समयः 02.00 PM –5.00 PM | Max. Marks - 70

---

I. **संक्षेपेण उत्तरं लिखत** **१० x २ - २०**

1. नैयायिकानां मतानुसारं ज्ञानं कति विधम् ?
2. नैयायिकानां मतानुसारं कीदृशज्ञानस्य (एव) निरूपणं शक्यते ।
3. साकांक्षा-धर्मः(सम्बन्धः) कः?
4. धर्म-धर्मि,आधार-आधेय-भावयोः भेदः अस्ति वा ?
5. कीदृशधर्मयोः निरूप्य-निरूपक-भावः भवति ?
6. निरूपणं येन भवति तत् --------- भवति ।
7. प्रतियोग्यनुयोगि-भावः कतिविधः?
8. “घटे नैल्यम्”, “नीलः घटः”, वाक्यद्वये उद्देश्यं किं, विधेयं किम् ?
9. चन्द्रसदृशं मुखम्। वाक्येस्मिन् कः सम्बन्धः?, कः अनुयोगी?, कः प्रतियोगी ?
10. घटाभावः। वाक्येस्मिन् कः सम्बन्धः?, कः अनुयोगी?, कः प्रतियोगी ?

II. **चतुर्णां पञ्चषैः वाक्यैः उत्तरं लिखत।** ४ x ५ - २०

1. वृत्तिनियामक-वृत्त्यनियामक-सम्बन्धयोः कः भेदः? सोदाहरणम् निरूपयत।
2. आधार-आधेय-भावं सोदाहरणम् निरूपयत।
3. अधोक्तवाक्यानाम् आधार-आधेय-भावं निरूप्य-निरूपक-भावं च उपयुज्य चित्रं कुरूत।

   1. उद्याने लताः सन्ति।

   2. वने मृगा सन्ति।
4. प्रतियोग्यनुयोगि-भावं सोदाहरणम् निरूपयत।
5. विषय-विषयी-भावं, निरूप्य-निरूपक-भावं च उपयुज्य चित्रं कुरूत।

   1. वह्निमान् पर्वतः।

   2. पुरुषः रूपवान्।
6. अवच्छेदक-अवच्छेद्य-भावम् उपयुज्य चित्रं कुरुत।

   1. इदानीं शालायां रामः अस्ति।

   2. वृक्षे शाकायां फलं अस्ति।

III. **द्वयोः दीर्घमुत्तरं लिखत** 2*15 = 30

7. प्रदत्त गद्यांशात् 6-7 विषयाणां न्याय-परिभाषायां सचित्रं विवरणं ददातु।

**नर्मदानदी**

नर्मदा भारतस्य सप्तमहानदीषु अन्यतमा वर्तते। नर्मदा भारतस्य काचित् पवित्रा नदी। इयं नदी मध्यप्रदेशराज्यस्य प्रमुखतमा नदी विद्यते। नर्मदायाः अपरं नाम शिवपुत्री इति। मध्यप्रदेशराज्यस्य अनूपपुरमण्डलस्य अमरकण्टकनगरम् अस्याः नद्याः उद्गमस्थानं वर्तते। नर्मदानदी विन्ध्याचल-पर्वत-श्रृङ्खला-सतपुडा-पर्वत-श्रृङ्खलयोः विभाजनं करोति। शङ्कराचार्यः अपि नर्मदायाः तीरे एव तस्य गुरुं गोविन्दभगवत्पादम् अमिलत्। द्वादशज्योतिर्लिङ्गेषु अन्यतमम् ओङ्कारेश्वरज्योतिर्लिङ्गं नर्मदायाः तीरे अस्ति।

नर्मदादेवी वैराग्यस्य अधिष्ठातृदेवी अस्ति। नदीषु गङ्गादेवी ज्ञानस्य, यमुनादेवी भक्त्याः, ब्रह्मपुत्रादेवी तेजसः, गोदावरीदेवी ऐश्वर्यस्य, कृष्णादेवी कामनायाः, सरस्वतीदेवी विवेकस्य च अधिष्ठातृदेवी अस्ति। नर्मदातटवासिनः नर्मदादेव्याः करुणामयं वात्सल्यस्वरूपं सम्यक्तया जानन्ति। जनाः नर्मदानद्याः परिक्रमणं श्रद्धया कुर्वन्ति। नर्मदायाः परिक्रमणे ३ वर्षाणि, ३ मासाः, १३ दिनानि च भवन्ति। इदं परिक्रमणं १३१२

कि. मी. पर्यन्तं अस्ति। नर्मदायाः पूजनं कृत्वा अस्य परिक्रमणस्य प्रारम्भः भवति। अश्वत्थामा इदानीम् अपि नर्मदायाः परिक्रमणं कुर्वन् अस्ति इति मान्यता अस्ति। देवगणाः अपि नर्मदायाः ध्यानं कुर्वन्ति। नर्मदायाः तटे दिव्यतीर्थानि, ज्योतिर्लिङ्गानि, उपलिङ्गानि च सन्ति। नदीषु नर्मदानद्याः एव परिक्रमणं विधिवत् भवति। अस्य परिक्रमणस्य प्रारम्भः अमरकण्टक-नगरात् ओंकारेश्वर-नगरात् वा भवति।

8. प्रदत्त गद्यांशात् 6-7 विषयानां न्याय-परिभाषायां सचित्रं विवर्णं ददातु।(15)

**जटायुः**

जटायुः विनतापुत्रस्य सूर्यसारथेः अरुणस्य पुत्रः। एषः पक्षिराजः गृध्रजातीयः। अस्य माता श्येनी। श्येन्याः कनीयान् पुत्र एषः। सम्पातिः अस्य ज्येष्ठः सहोदरः। भ्रातरावेतौ अतीव बलशालिनावास्ताम्। एकदा उभावपि सोदरौ आत्मनोः वेगबलं परीक्षितुमिच्छन्तौ अत्युपरि गगने डयमानावास्ताम्। यदा जटायुः तीव्रेण सूर्यातपेन सन्तप्तः अभवत्, तदा सम्पातिः तस्य उपरि स्वयं डयमानः स्वपक्षाच्छादनेन अनुजं ररक्ष। तथापि भास्करकरज्वालाभिर्दग्धगात्रः सन् निश्शक्तः जटायुः दण्डकारण्येऽपतत्। सम्पातिरपि दग्धपक्षतिः सन् द्क्षिणसमुद्रतीरे पपात। तदा तत्रैव तपश्चरन् निशाकरनामा तापसः एनमवलोक्य करुणयोपचचार। ततः कदापि सम्पातेः जटायुषा मेलनं नाभवत्। जटायुरपि तत्र दण्डकारण्ये कतिपयैरहोभिः वेदनामुक्तशरीरः सन् क्वचन पर्वतगुहायामुवास। एकदा वनवासिना श्रीरामेण सङ्गतः जटायुः, तेन पृष्टः स्ववृत्तान्तं तस्मै निवेदयन्, अहं तव पितुः दशरथस्य बाल्यमित्रम् इत्यपि प्रोवाच। तच्छ्रुत्वा सन्तुष्टो रामः स्वस्य वनवासवार्तां श्रावयित्वा पञ्चवटीपरिसररक्षणार्थं तं नियोजयामास।

ततः रावणः यदा सीतापहरणं कृतवान् तदा जटायुः रावणेन सह युद्धं कृत्वा, रावणेन कृत्तपक्षतिः सन् भूमावपतत्। सीतामन्विषतो रामलक्ष्मणयोरागमनं प्रतीक्षमाणः, रामागमनपर्यन्तमपि प्राणान् सन्धार्य ततः रामाय रावणकृतसीतापहरणोदन्तं विनिवेद्य मृतवान्। रामोऽपि यथाविधि तस्यान्तिमसंस्कारं विधाय कृतकृत्यो बभूव। जटायोः कर्णिकारः, शतगामी, सारसः, रज्जुबालः, भेरुण्डश्चेति पञ्च पुत्राः।
सीतान्वेषणं कुर्वद्भ्यः कपिभ्यः सम्पातिरेव सीतायाः स्थानम् उक्तवान्। सुपार्श्वः अस्य पुत्रः।

***

QP Code: 504 (NV)

# कर्नाटकसंस्कृतविश्वविद्यालयः - परिसरः

## स्नातकोत्तरपरीक्षाः - २०२२

### एम्.ए. – संस्कृत - द्वितीयषाण्मासिकी परीक्षा

### शास्त्रम् – न्याय-वैशेषिकशास्त्रम्, पत्रिका - ०३

### विषयः – न्यायभाष्यम् (प्रथमाध्यायस्य द्वितीयाह्निकम्)

**Total No. Of Questions: 3** **Total No. Of Printed Pages: 1**

**Date: 19.10.2022** **Time: 10.00AM to 01.00PM** **Max Marks: 70**

---

I. संक्षेपेण उत्तरत । 10x2=20

1. कति कथाः भवन्ति ?
2. वितण्डा ?
3. छलं कति विधम् ?
4. सूत्रकारः कः ?
5. निदर्शनम् इत्यस्य पदस्य अर्थः कः ?
6. नवकम्बलोऽयं माणवकः इत्यत्र वक्तुरभिप्रायः कः ?
7. प्रथमाध्यायस्य द्वितीयाह्निके कति सूत्राणि सन्ति ?
8. हेत्वाभासाः के ?
9. हेत्वाभासपदस्य अर्थः कः ?
10. न्यायभाष्यस्य कर्ता कः ?

II. प्रश्नाः समाधेयाः। 4x5=20

1. "अनैकान्तिकः सव्यभिचारः" इति सूत्रं व्याख्यात ।
2. "साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः" इति सूत्रं व्याख्यात ।
3. निग्रहस्थानम् ।
4. "तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम्" इति सूत्रं व्याख्यात ।
5. "कालात्ययापदिष्टः कालातीतः" इति सूत्रं व्याख्यात ।
6. "स प्रतिपक्षस्थापनाहीनो वितण्डा" इति सूत्रं व्याख्यात ।

III. निबन्धात्मकमुत्तरं लिखत । 2x15=30

1. कथाः ।
2. हेत्वाभासाः ।
3. छलम् ।

*******

## QP Code No.:401 (AL)

Total No. of Questions: 3 | Total No. of Printed Pages: 2

### स्नातकोत्तरपरीक्षाः-२०२२

### एम्.ए. आचार्यकक्ष्या - प्रथमषाण्मासिकी परीक्षा

### विभाग: – अलङ्कारशास्त्रम् - पत्रिका-१

### विषयः – चन्द्रालोक:

दिनाङ्कः–**26/04/2022** | गरिष्ठाङ्काः– ७०

समयः–10.00 AM – 1.00 PM | Max. Marks - 70

---

**I.** एकेन वाक्येन उत्तरं लिखत । **10X2=20**

१) सामान्यालङ्कारस्य लक्षणं किम्?

२) अलङ्कारशब्दस्य अर्थः कः?

३) उपमालङ्कारस्य भेदाः कति? ते च के ?

४) काव्यलिङ्गालङ्कारस्य लक्षणं किम् ?

५) 'स्त्रीभिः कामः प्रियैश्चन्द्रः कालः शत्रुभिरैक्षि सः' इत्यत्र कः अलङ्कार?

६) जयदेवस्य कालः कः?

७) अनन्वयालङ्कारस्य लक्षणं विवृणुत ?

८) 'पीयूषवर्ष' इति कस्य नाम?

९) यमकालङ्कारस्य लक्षणं लिखत ?

१०) उपमेयोपमालङ्कारस्य लक्षणं किम्?

**II.** लघुनिबन्धात्मकम् उत्तरं लिखत । **4X5=20**

१) विषादालङ्कारः ।

२) उपमालङ्कारः ।

३) व्यतिरेकालङ्कारः ।

४) परिकर ।

५) प्रहर्षाणलङ्कारः।

६) दीपकालङ्कारः ।

**III.** निबन्धात्मकम् उत्तरं लिखत **15X2=30**

१) जयदेवस्य देश–काल–कृतीनां परिचयं कुरुत ।

२) तुल्ययोगिता – मीलितः –स्मृतिभ्रान्तिसन्देहालङ्काराणां लक्षणान्वयं सोदाहरणं लिखत।

३) अपह्नुति–अलङ्कारस्य प्रभेदान् सोदाहरणं विवृणुत ।

***

**2 Teaching-Learning and Evaluation**

**2.5 Evaluation Process and Reforms**

**2.5.6 Use of Sanskrit as a medium for Question Paper setting and Answering in Examination.**

**Link to document related samskrit medium resolution**

**https://ksu.ac.in/wp-content/uploads/2023/04/2.5.6-samskrit-medium.pdf**

**Link to Sanskrit Medium Question Paper**

**https://ksu.ac.in/wp-content/uploads/2023/04/QP.pdf**